National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2025; 1(61): 156-159
© 2025 NJHSR
www.sanskritarticle.com

दीपक कुमार
जैनदर्शनविभागः,
श्रीलालबहादुरशास्त्रीराष्ट्रीयसंस्कृत-विश्वविद्यालय, नवदेहली

Correspondence:
दीपक कुमार
जैनदर्शनविभागः,
श्रीलालबहादुरशास्त्रीराष्ट्रीयसंस्कृत-विश्वविद्यालय, नवदेहली

# जैनधर्मे श्रावक-श्राविकयोः सामाजिक उत्तरदायित्त्वं नैतिक आचरणं च

दीपक कुमार

**योगशास्त्रे श्रावकाचारः**

गृहस्थाश्रमेऽपि ये जनाः जैनमतानुयायिनः सन्ति ते, श्रावक इति नाम्ना ज्ञायन्ते। ते स्वजीवने अहिंसादि पञ्चानां महाव्रतानां पालनं कुर्वन्ति। एतेषां पञ्चमहाव्रतानां विस्तरेण विवेचनं प्रस्तुतग्रन्थस्य षष्ठेऽध्याये वर्तते। एतादृशाः गृहस्थाः सिद्धजैनमूनीनां प्रवचनानि शृण्वन्ति तस्मादेव तेषां नामकरणं श्रावक इति अभवत्। श्रावकाः स्वजीवने साधूनामिव दीक्षां न कारयन्ति तथापि ते द्वादश श्रावकव्रतानां पालनं कुर्वन्ति। श्रवण इत्यनेन शब्देनैव श्रावक शब्दः निर्मितो भवति यस्यार्थः श्रवणकर्तेति वर्तते। संतानां ये उपदेशाः सन्ति तेषां श्रवणं मनसि धारणञ्चेति श्रावकस्य प्रमुखं कार्यं भवति।

उपासकः, अणुव्रती, देशाविरतिः सागरादयोऽपि श्रावकशब्दस्यैव पर्यायास्सन्ति।[1] श्रमणपरम्परा प्राचीनकालादेव जैनेषु, बौद्धेषु चार्वाकेषु च प्रचलिता जाता। श्रमणः कश्चित् साधुः भवति यः सर्वविषयविरतः भवति। संस्कृतभाषाणां पालिभाषायाञ्च श्रमणशब्दस्य कृते श्रमणं शमनं सगनञ्चापि शब्दाः प्रयुज्यन्ते। सम्पूर्ण श्रमणपरम्पराया आधार एव एतेषु वाचकार्येषु वर्तते यथा- 'श्रमण' इति शब्दः श्रम- धातोः निष्पन्नो भवति यस्यार्थः परिश्रम अस्ति।

बृहदारण्योपनिषदि श्रमण इति शब्दस्य प्रयोगः 'श्रमणोऽश्रमणस" इत्यर्थे कृतः।[2] आचार्यहेमचन्द्रानुसारेण साधोः चरित्र्श्रावकस्य चापि चरित्रं समानमेव भवति।

यतोहि उभयोरपि चरित्रं तु समानं परञ्च व्रतपालनं मात्रा भिन्ना भवति। तत्र मात्राभेदस्य कारणं तु तयोः योग्यता तथा परिस्थितिकभिन्नता वर्तते। गृहस्थश्रावकस्य साधो इव योग्यता परिस्थितिश्च नैव भवति। गृहस्थे वसन् कश्चित् श्रावकः सम्पूर्णतया व्रतनियमानां पालने समर्थो न भवितुं शक्नोति। तस्मादेव कारणाद् अधिकारिभेदात् चरित्रस्यापि भेदद्वयं कृतम्।[3] गृहस्थधर्मे श्रावकस्य पात्रतां योग्यतां च निम्नलिखितानि पञ्चत्रिंशत् बिन्दूनि द्योतयन्ति-

1. न्यायपूर्वकं धनार्जनम्, 2. शिष्टपुरुषामाचारस्य प्रशंसकः स्यात्, 3. असमानकुलगोत्रोत्पन्नै परञ्च समानशीलस्वभावयुक्तैः सह विवाहसम्बन्धादिस्थापनम्, 4. मनसि पापकर्मणां कृते भयः। 5. प्रसिद्धदेशाचारस्य पालनम्, 6. निन्दाराहितयं विशेषरूपेणं राज्ञां विषये 7. स्वच्छे तथा चोपयुक्ते स्थाने गृहनिर्माणम्, 8. गृहाद् बहिर्गमनाय नैकानि द्वाराणि भवेयुः, 9. सद्भिः सह सङ्गतिं कुर्वीत, 10. मातापित्रोः सेवाकार्यं कुर्यात्, 11. परस्परकलहात्मकात् वातावरणात् पृथक् भवेत् अथवा चित्ते क्षोभोत्पादकवातावरणे न वसेत्।।[4] 12. निषिद्धकर्मणां मनसा वचसा कर्मणा परित्यागः। 13. धनागमानुसारं व्ययकरणम्, 14. स्वकीयार्थिकस्थित्यनुसारं वस्त्रादिधारणम्, 15. अष्टगुणोपेर्तन बुद्धिबलेन सह धर्मश्रमणस्याभ्यासः, 16. अजीर्णता जाते सति भोजनस्य यथोचितं त्यागः, 17. धर्मेण सहैव कामार्थमोक्षपुरुषार्थाणां परस्परविरोधरहितसेवनम्, 18. अतिथिसाधुदीन जनानां यथायोग्या सत्कारपूर्वकं सेवा, 19. नियतसमये सत्कारपूर्वकं भोजनग्रहणम्, 20. दुराग्रह पूर्वकं व्यवहारे आसक्तिराहित्यम्, 21. गुणग्रहणस्य स्वभावः तथा च गुणमुक्तानां पुरुषाणां वचसा प्रशंसा, 22. देशकालानुगुणं व्यवहारः, 23. स्वसामर्थ्यावबोधः स्वशक्तिं विज्ञायैव कार्येषु प्रवृत्तिः, 24. सदाचारीपुरुषाणां वयोवृद्धजनानञ्च श्रद्धापूर्वकसेवा, 25. दायित्वस्य पालनं स्वाश्रितजनानां

कर्त्तव्यनिष्ठापूर्वकं पालनादिकार्यम्, 26. दीर्घदर्शिता अर्थात् भूतभविष्यविषयकविमर्शपूर्वकं कार्यप्रवृत्तिः। 27. हिताहितादि-कार्याणां कल्याणयुक्त-विषयेषु प्रवृत्तिः, 28. कृतोपकराणां जनानं सत्कारपूर्वकं सम्मानम्, 29. सदाचारेण सेवाकार्येण च समाजे स्वप्रतिष्ठायाः लोकप्रियतायाः च वर्धनम्, 30. सर्वदा लज्जाशीलता व्यवहारे स्यात् अनुचितकार्ये लोकलज्जायाः भावः भवेत्, 31. दीनदुःखीप्राणिषु दयाभावः स्यात्, 32. मुखमण्डले शान्तिः तथा च प्रसन्नता स्यात्, 33. परोपकारयुक्तकर्मसु सर्वदा सक्रियतापूर्वकं आसक्तिः स्यात्, 34. कामक्रोधादिषड् शत्रूणां मनसा वचसा कर्मणा च परित्यागः, 35. सर्वाणीन्द्रियानि संयमिता स्युः।[5]

यथा क्षेत्रे बीजस्य वपनात् पूर्वं क्षेत्रस्य कर्षणादिकार्यैः शुद्धिकरणमावश्यकं भवति यथा च विशालभवनस्य निर्माणात् पूर्वं तस्य समुचित प्रकारेण भूतले स्थापना आवश्यकी भवति तथैव गृहस्थधर्मे प्रवेशात् पूर्वं जीवन शुद्धिः सङ्कल्पशुद्धिश्च आवश्यकी भवति। आचार्येण हेमचन्द्रेण योगशास्त्रस्य प्रसङ्गे यदुक्तं तह सर्वमेव दृढ जीवनस्य स्थापनारूपेण वर्तते।[6] सुदृढ़ाधारस्योपरि एव भव्यप्रासादस्य निर्माणं भवितुं शक्नोति। तत् विशालभवनं सुचिरं कालं यावत् यथावत् तिष्ठति। एते पूर्वोक्ताः मार्गानुसारिणः पञ्चत्रिंशत् गुणाः वर्तन्ते। व्रतमयाजीवनं यापयितुं व्यवहारिकी पवित्रता परमावश्यकी वर्तते।[7]

**श्रावकस्य द्वादशव्रतानि-**

जैनदर्शने श्रावकानां द्वादशव्रतानि कथितानि। यथा चोक्तम् योगशास्त्रे-

**सम्यक्त्वमूलानि पञ्चाणु व्रतानि गुणास्त्रयः।**
**शिक्षापदानि चत्वारि, व्रतानि गृहमेधिनाम्।।**

गृहस्थानां द्वादशव्रतेषु तु पञ्चासु व्रतानि, त्रय, त्रीणि गुणव्रतानि तथा च चत्वारि शिक्षाव्रतानि सन्ति। एतानि मूलानि सम्यक्त्वमूलानि भवितव्यानि। सम्यक्त्वस्य प्राप्त्यनन्तरमेव गृहस्थस्य सम्यक्-चारित्र्यं फलीभूतं भवितुं शक्नोति।[8]

**पञ्च-अणुव्रतानि-**

करणद्वयस्य योगत्रयस्य च सहयोगेन हिंसादिदोषाणां परित्यागं एव जिनेन्द्रदेवेन पञ्चव्रतानि कथितानि।[9] लोके अनेके जनाः शारीरिकरूपेण असमर्थाः सन्ति। तेषां दीनावस्थायाः कारणन्तु पूर्ववर्तिहिंसैव वर्तते। हिंसाया एवं प्रत्यक्षफलं तदस्ति। एतत् तथ्यं विज्ञाय बुद्धिमान् मानवः भयत्रस्ताणां जीवानां मानसिकीं शारीरिकीं च हिंसां न कुर्यात्।[10] अहिंसाधर्मस्य पालकेन मुक्ते अभिलाषकेन च स्थावराणामपि हिंसा नैव कर्तव्या।[11]

**हिंसायाः फलम्-**

आगमशास्त्रेषु वर्णितमस्ति यत् जीवहिंसायाः फलत्वेन रौद्रध्याने तत्परौ सुभूमब्रह्मदत्तौ चक्रवर्तिनौ सप्तमं नरकं पतितावति।[12] वैदिकी हिंसा हिंसा न भवति इत्येतद् वैदिकानां वचनं वर्तते।

**अहिंसाव्रतस्य फलम्-**

दोषाः कथ्यन्ते। उभयोरपि पक्षयोः ये दोषाः ते स्वपादोषाः भवन्ति। भिक्षासम्बद्धाणां द्विचत्परिंशत् दोषाणां ज्ञानाय आचाराङ्गस्य सूत्रकृताङ्गस्य निशीथसूत्रस्य चावनोकनं करणीयम्।

दीर्घायुष्यं, सुरूपता, निरोगिता प्रशंसनीयता च अहिंसायाः फलानि सन्ति। वस्तुतः अहिंसाव्रतस्य पालननैव सर्वे मनोरभाः पूर्णाः भवन्ति।[13]

**नास्तिकोऽधमः-**

यैः क्रूरकर्मकैः ऋषिभिः केनापि प्रसङ्गेहिंसाया उपदेशः कृतः ते नास्तिकेभ्य अपि दुर्जनाः सन्ति। ते दुष्टजनाः घोरनरकेषु पतिष्यन्ति इति जैनानां मान्यता वर्तते।[14]

भैरव-भवानि देवान् प्रति तथा यज्ञादिकर्माणि प्रति ये बलिप्रथाया अवलम्बनं कुर्वन्ति प्राणिनधं च सम्पादयन्ति ते तु जीवने मरणानन्तरञ्च विविधप्रकारकाणां नरकादिदुःखान् प्राप्नुवन्ति।

**असत्यस्य भेदाः फलानि च-**

जिनेन्द्रदेवेन कन्यालीकं गो-उलीकं, भूमि-उलीकं, न्यासापहारालीकं कूटसाक्षी च भेदेन पञ्चविधं असत्यमुक्तम्।[15] सह कालिकाचार्यमिव यस्तु मृत्युभयेन शीलसङ्कोचभयेन वा असत्यभाषणं नैव कर्तव्यम्। एतादृशैः कारणैः यदि कोऽपि असत्यं वदति तर्हि सः नरकं प्राप्नोति।[16] ये सत्पुरुषाः ज्ञानबलेन चरित्रबलेन च सर्वदा सत्यभाषणं कुर्वन्ति तेषां चरणाधुलिरपि धरां पावनां करोति।[17]

**चौर्य-कर्म महापापम्-**

जैनशास्त्रानुसारं चौर्यकार्यं महापापं कथितम्। मृत्युं प्राप्तस्य दुःखं सावधि युक्तं परञ्च यस्य धनहरणं भवति तस्य दुःखन्तु दीर्घकालिकं भवति।[18]

ब्रह्महत्या, मदिरापानं, चौरकर्म तथा च गुरोः पत्न्या च सह सहवायः महापातकं भवति। यस्तु एतादृशानि कार्याणि करोति तस्य सङ्गतिरपि पञ्चप्रकारकं महापातकं भवति।[19]

**अस्तेयव्रतस्य फलम्-**

**परार्थग्रहणे येषां नियमः शुद्धचेतसाम्।**
**अभ्यायान्ति श्रियस्तेषां स्वयमेव स्वयं वरा।।**[20]

अर्थात् शुद्धचित्तयुक्ताः जनाः ये परेषां धनस्य ग्रहणं न कुर्वन्ति तेषां समक्षं लक्ष्मी स्वयमेवागच्छति। तेषां सत्पुरुषाणां सर्वदा कल्याणं भवति। सर्वत्रापि प्रशंसायाः पात्राणि ते सज्जनाः। स्वर्गमिव सुखं ते जीवन्नेवानुभवन्ति।

**ब्रह्मचर्यव्रतम्-**

श्रावकाणां ब्रह्मचर्यपालनस्य विषये जैनशास्त्रेषु परम्पराभेदः प्राप्यते। सामान्यप्रकारेण स्वकीयां विवाहितां पत्निं विहाय परस्त्रीगमननिषेधः शास्त्रेषु प्रतिपादितम्। केचन आचार्याः व्रतस्यास्य भेदस्य द्वयं कुर्वन्ति।

1. स्वस्त्रीसंतोषः।, 2. परस्त्रीत्यागश्च।[21]

साधूनां महाव्रतपालननियमानामिव गृहस्थनियमानां विषयेऽपि तत्र एकरूपता नास्ति। यथा- परस्त्रीत्यागस्य तात्पर्यं कुत्रचित् तु सर्वासां स्त्रीणां परित्यागः स्वीक्रियते कुत्रचित् च केवलं परविवाहितस्त्रीणां ग्रहणमस्ति। तदनुसारं स्वस्त्री तथा चा विवाहिता अन्या गृहिता वर्तते। भिक्षाप्रसङ्गे भिक्षायाः दातापक्षतः ये दोषा भवन्ति ते उद्गमदोषाः भवन्ति। भिक्षुकपक्षतः ये दोषाः जायन्ते ते उत्पादना

**आदानसमितिः-**

आसनस्त्रोहरणादिरांयमस्य उपकरणान् समुपितप्रकारेण ग्रहणम् कुर्यात्। तेषां सम्भारान् प्रतिलेखनां कुर्यात् सैवादानसमितिः

कथ्यते।[22] अस्याः समितेः पालनकर्ता मुनिः हिंसादिदोषेभ्यः पृथक् भवति।

**उत्सर्गसमितिः -**

**कफमूत्रफलप्राय, निर्जन्तुजगतीतले।**
**यत्नमिदुत्सृजत्साधुः सात्सर्गसमितिर्मवेत्।।**
**कफगतमूत्रादिपदार्भाणां सूक्ष्मजीवरहितायो**
**भूमौ त्याग एवोत्सर्गसमितिः कथ्यते।**[23]

**मनुगुप्तिः-**

सर्वविधप्रकारेभ्य कल्पमाभ्यः रहितो मुनिः समभावे स्थितो भूत्वा आत्मन्येव रमणं करोति। सैव स्थिति 'मनोगुप्तिः' पदेनाभिधीयते।[24] मनोगुप्तिः त्रिप्रकारात्मिका भवति।

**परिग्रहव्रतस्य मर्यादा-**

आसक्तिफलं सन्तोषराहित्यं स्वस्मिन् विश्वासराहित्य च भवति। सन्तोष न्यूनतया मानसिकं दुःखं भवति। अतः परिग्रहस्य नियन्त्रणं आवश्यकं वर्तते।[25] यथा मर्यादातः अधिकं धनधान्यदिभिः पूरितं जलयानं जले निमग्नो जायते तथैव परिग्रहस्य मर्यादामतिक्रम्य मानवः संसारे एव निमग्नः भवति। महापरिग्रहस्तु नरकस्य साक्षात् कारणं वर्तते। अत एव श्रावकेण परिग्रहस्य मर्यादा अवश्यमेव करणीया।[25] शास्त्रेषु कथितं यत् परिग्रहेण किञ्चिन् मात्रमपि लाभः नैन सम्भवति अपितु महती हानिरेव जायते। ये रागद्वेषादिक्लेशाः प्रारम्भे न भवन्ति तेषां उदयोऽपि परिग्रहेण जायते। परिग्रहस्य मानसिक लालसया श्रेष्ठमूनीनामपि मनसि विकृतिर्भवति सामान्यजनानां पुनः का वार्ता?[26] परिग्रह एव सर्वदोषाणां जनको वर्तत इति ग्रहीतव्यम्। यथा चोक्तम्-

**छेओ-अेओ-वसनं, आभास किलेस....... णणु पवचो।**[27]

यदि कश्चित् श्रावकः क्रमशः परिग्रहस्य न्यूनतामुपगच्छति तर्हि तस्य मानसिकी शान्ति स्थिरतां याति। तेन आत्मनः निरन्तररूपेण निर्मलता वर्धते। तस्य परिणामस्वरूपेण सांसारिकं परिभ्रमणम् अपि नश्यति।

**संतोषस्य महिमा-**

**सन्निधौ निधयस्तस्य कामगव्यनुगामिनी।**
**अमरा किंकरायन्ते संतोषो यस्य भूषणम्।।**[28]

अर्थात् सन्तोषयुक्तस्य मानवस्य पार्श्वे समृद्धयः भवन्ति। कामधेनुमिव नानासम्यत्तयः अनुगामिन्यः भवन्ति सन्तोषशीलस्य। देवा अपि सेवकमिव आज्ञाकारिणो भवन्ति।

**दिगव्रतम्-**

श्रावकस्य पञ्चाणुव्रतानां विवेचनात् परं साम्प्रतं गुणव्रतानां शिक्षाव्रताणाऽन्य स्पष्टीकरणमत्र क्रियते।

यानि गुणाः अहिंसादिपञ्चाणुव्रतानां सहायकानि भवन्ति ते तानि गुणानां उत्पादकानि व्रतानि तान्येव गुणव्रतानि कथ्यन्ते। दिग्वत पूर्वं विशेषरूपेण अहिंसाव्रतं पुष्णाति। एतानि गुणव्रतानि मूलव्रताणां पोषणं कुर्वन्ति उत्तरव्रताणि सन्तीति जैनागमेषु मान्यता वर्तते। दशदिक्षु न्यायारादिकर्माणां कृते ये जनाः समुद्रयात्रां कुर्वन्ति तथा च परदेशगमनं कुर्वन्ति तेषां मर्यादानिर्धारणाय एतानि दिग्व्रतानि सन्ति।[29]

ये जनाः दिग्व्रतावलम्बिनः भवन्ति तेषां लोगनिवृत्तिः दिग्व्रतेभ्य एव जायते। विविधदेशेषु व्यापाराय मात्राणां अत्यधिकवृद्धिः न भवेत् तस्मै एते दिग्व्रतानि सन्ति यतोहि मर्यादापालनेन लोभनिवृत्तिः भवति न्यूना जायते वेति अभिप्रायो वर्तते।[30]

**योगोपभोगव्रतम्-**

यस्मिन् व्रते सामर्थ्यानुसारं योगोपभोगस्य नियमनिर्धारणं क्रियते तदेव व्रतं भोगोपभोगनाम्ना ज्ञायते। एतद् द्वितीयं गुणव्रतमस्ति। यद् वस्तुः प्रयोगदृष्ट्या एकवारं भोगां भवति। तद्वस्तुः भोगनाम्ना कथ्यते। अनेन प्रकारेण वारं वारं भोगयोग्यं मन्यते। गृहशय्यावाहनादि वस्तूनि उपयोगयोग्यानि सन्ति।[31] अस्मिन् व्रते कानिचित् भोगवस्तूनि तथैव कानिचित् दुपभोगवस्तूनापि त्याज्यानि सन्ति। तदनुसारं मदिरामांसादिपदार्थाः, अनन्तकायकन्दमूलादिफलानि, रात्रियोजनं, दध्ना सह द्विदलभोजनं, कुत्सितानाञ्चापि निविद्धवस्तूनि सन्ति।

म्हाराजमनुनापि मांसभक्षणस्य निषेधः कृतः। मांसरूपे भक्षिताः जीवाः कालान्तरेण अस्मान्वेव भक्षयन्ति।[32] वेदानां वेत्तारः कथयन्ति यत् सूर्यः तेजोमयः वर्तते। तस्मिन् ऋक् यजुस्सामाः वेदत्रयीरूपेण तेजोमयरूपेण च विद्यन्ते। सामान्यतया दिवस एव सूर्य किरणैः पवित्रीकृत्य पदार्थभोगः करणीयः। तस्मादेव कारणात् सूर्यास्तात् पश्चात् भोजनं निषिद्धमिति मन्यते। अनेन प्रकारेण त्याज्यकर्मणां त्यागं कृत्वा श्रावकः सद्गतिं प्राप्नोति। साधुधर्मस्थानादिपूजानां सत्कारं कृत्वा श्रावकः महाश्रावकस्य श्रेणीमुपगच्छति।[33]

श्रावकानां कृते आन्तरिकविकाराणां परित्यागेन सह बाह्यविकारा अपि परित्यागयोग्याः सन्ति। बाह्यविकारेभ्यः युक्तः जनः आन्तरिकविकारेभ्यः मुक्तो नैव भवितुं शक्नोति। अतः श्रेष्ठजनस्य कृते बाह्यविकारस्वरूपं विद्यमानधनं परित्यागयोग्यं समर्पणयोग्यं वा भवति। सच्चरित्राय सर्वस्व त्यागं नितान्तं आवश्यकं भवति।[34]

**श्रावकस्य दिनचर्या**

श्रावकेण ब्रह्ममुहुर्ते शय्यात्यागः करणीयः। तदनन्तरं पञ्चपरमेष्ठिध्यानं विधातव्यम्। कोऽहं! मम धर्मः कः इति ? कस्मिन् कुले मम जन्म जातम्? कानि व्रतानि मया स्वीकृतानि? एतत् सर्वं प्रातरूत्थाय मनसि चिन्तनीयम्।[35] एतत् सर्वं मनसि सम्यक् प्रकारेण विचिन्त्य भगवतः जिनेन्द्रस्य स्तुतिः कार्या। जिनमन्दिरगमनमपि सामर्थ्यानुसारं करणीयम्। देवालयं गत्वा तत्र जिनदेवस्य वारत्रयं प्रदक्षिणा करणीया। पुष्पादिद्रव्यैः पूजाकार्यं विधाय श्रेष्ठानां स्तोत्रानां पाठः कर्तव्यः।[35] कथनस्याभिप्रायो वर्तते यत् श्रावकेण सर्वदा गुरोः सेवायां तत्परः भवितव्यः। प्रातः कालिकं पूजादिकार्यं कृत्वा श्रावकः धनोपार्जनस्य क्षेत्रं गत्वा बुद्धिपूर्वकं स्वोद्योगं कुर्यात्। धनोपार्जनेन धर्मनियमेषु बाधा न स्यात्तथा कार्यं करणीयम्।[37] मध्याह्ने भोजनं कृत्वा शास्त्रविद्भ्द्यः शास्त्रस्य अर्थः ज्ञातव्यः। अनेनैव प्रकारेण सन्ध्याकालेऽपि गुरुभगवतः सेवां विधायं प्रतिकमणादिषट्व्रतानि करणीयानि। रात्रौ ब्रह्मचर्यस्य पालकश्रावकेण स्वल्पनिद्राया सेवनं करणीयम्।[38] जेनागमेषु लिङ्गं तथा च 'वेद' इत्येतयोः शब्दयोः प्रयोगः प्राप्यते। तत्र लिङ्गशब्दस्य तस्य तात्पर्यं आकृतिशब्देन सह वर्तते। वेदशब्दस्यार्थः वासनायाः पर्यायत्वेन भवति। स्त्री केवलं वासनापूर्तेः केन्द्रं नास्ति। स्त्री तु त्यागस्य तपसः सेवायाश्च साक्षात्मुर्ति वर्तते। सा स्त्री पुरुषमिव साधनां कृत्वा मुक्तिं प्राप्तुं योग्या वर्तते। केवलं निन्दायाः पात्रं प्रताडनायाः पात्र वेति बुद्धौ धारणं सर्वथा अनुचितं भवति।[39]

**श्रावकस्य मनोरथाः**

श्रावकस्य मनसि जैनधर्मं प्रति श्रद्धायाः पराकाष्ठा स्यात्। जैनधमरहितं तुं जीवनं सर्वथा व्यर्थमेवास्ति तथाविधं चित्तस्य धारणा स्यात्। जैनधर्मं परित्यज्य कश्चित् श्रद्धयान्वितः श्रावकः चक्रवर्तिनृपस्य सिंहासनमपि न स्वीकरोति। जैनधर्मे तु दारिद्रयपूर्णं जीवनं यापयितुं नास्ति मनसि कश्चित् विकारः। श्रावकस्य मनोरथाः सर्वदा सर्वस्व त्यागपूर्णे जीवने एव विहिता भवन्ति। सांसारिकानां समस्तपदार्थाणां त्यागकर्ता, जीर्णशीर्णवस्त्रधारकः, शरीरस्यालङ्का-रादिसंस्काररहितः, मधुकरिव्रतावलभी च भवितुं श्रावकस्य मनोरथाः भवन्ति। सः गूढाजन्यां ध्याने लीनो भवितुं चिन्तयति। ध्यानस्य तल्लीनता तन्ममता च ये कदा भविष्यतीति। विषे महदौत्पुवकं जायते।[40] अनेन प्रकारेण जैनधर्मस्य विषये मनसि श्रद्धयान्वितः श्रावकः देवलोके इन्द्रणेव महत्पदं प्राप्नोति। तत्र जगतः सर्वोकृष्टं महत्पुण्यं कृत्वा आनन्देन समयं यापयति।[42] सम्पूर्णां देवयोनिं सानन्दं भुक्त्वा ततः च्युतो भवति। संसारे मनुष्यजन्म धारयति। आदौ संसारे दुर्लभभोगान् भुक्त्वा अन्ते च विषयविरक्तो भूत्वा शुद्धात्मा सप्तसु अष्टसु वा भवसु मुक्तिं प्राप्नोति।[43]

**संदर्भ ग्रंथ**


1 अणुव्रतोऽगारी, तत्त्वार्थसूत्र, 7/20

2 बृहदारण्यकोपनिषद्. 3/11

3 सर्वात्मना यतीन्द्राणामेतच्चारित्रमीरितम्।
यतिधर्मानुरक्ताना, देशत स्यादगारिणाम्।।
हेमचन्द्रविरचितं योगशास्त्रम्, 1/46,

4 तदेव, 1/47 -51, 47. न्यायसम्पन्नविभवः, शिष्टाचार प्रशंसकः।
कुलशीलसमैः सार्द्धं, कृतोद्वाहोन्मगोत्रजैः।।
पापभीरु प्रसिद्धश्च, देशाचार समाचरन्।
अवर्ण्णवादी न क्वापि, राजादिषु विशेषता।। योगशास्त्रम् 1/48
अनतिव्यक्तगुप्ते च, स्थाने सप्रातिवेश्मिके।
अनेक-निर्गमद्वार-विवर्जित-निकेतनम्।। तदेव 1/49
व्ययमामोचित कुर्वन्, वेष वित्तानुसारता।
अष्टभिर्धीगुणैर्युक्तः श्रृण्वानो धर्ममन्वहम्।। तदेव 1/51

5 दीर्घदर्शी, कृतज्ञो लोकवल्लभः।
सलज्ज सदय सौम्य, परोपकृतिकर्मठः।। योगशास्त्रम् 1/55
अन्तरङ्गारिषड्वर्ग-परिहार-परायणः।
वशीकृतेन्द्रियग्रामोगृहिधर्माय कल्पते।। तदेव 1/56

6 भावनाभिर्भावितानि, पञ्चभि पञ्चभिः क्रमात्।
महाव्रतानि लोकस्य, साधयन्त्यव्यय पदम्।।
योगशास्त्रम् 1/25

7 मनोगुप्त्येषणादानेर्याभि समितिभि सदा।
दृष्टान्नपानग्रहणेनाहिंसा भावयेत् सुधी।। तदेव. 1/26

8 सम्यक्त्वमूलानि पञ्चाणुव्रतानि गुणास्त्रय।
शिक्षापदानि चत्वारि, व्रतानि गृहमेधिनाम्।। तदेव. 2/1

9 शङ्काकाङ्क्षाविचिकित्सा-मिथ्यादृष्टिप्रशंसनम्।
तत्पस्तवश्च पञ्चापि सम्यकत्व दूषयन्त्यलम्।। तदेव. 2/17

10 पंगुकुष्ठिकुणित्वादि, दृष्ट्वा हिंसाफल सुधी।
निरागस्त्रस्य जन्तूना, हिंसा सङ्कल्पतस्त्यजेत्।।
योगशास्त्रम्, 2/19

11 निरर्थिका न कुर्वीत जीवेषु स्भावरेष्वपि।
हिंसामहिंसाधर्मज्ञ, काङ्क्षन्मोक्षमुपासकः।।

12 श्रूयते प्राणिधातेण, रौद्रध्यानपरामणौ।
सुभूमो ब्रह्मदत्तश्च, सप्तम नरकं गतौ।। तदेव. 2/27

13 तिलेर्दी हिमवैर्गाषैरद्भिर्मूलफलेन वा।
दतेन मास प्रोयन्ते, विधिवत्पितरो नृणाम्।। तदेव. 2/42

14 योगशास्त्रम्. 2/37

15 तदेव. 2/54

16 ब्रूयाद् भियोपरोधाहा, नासत्य कलिकार्थवत्।
यस्तु ब्रूतें स नरक, प्रभाति वसुराजवत्।। तदेव. 2/60

17 ज्ञान चांरित्रयोर्मूल, सत्यमेव वदन्ति ये।
धात्री पवित्री क्रियते, तेषा चरण-रेणुभिः।। तदेव. 2/63

18 एकस्यैक क्षणं दुःख मार्यमाणस्य जायते।
सुपुत्र-पौत्रस्य पुनर्यावज्जीव हृते धने। योगशास्त्रम्. 2/68

19 तदेव. 2/71

20 तदेव. 2/74

21 पण्डत्वमिन्द्रियच्छेच्छेद वीक्ष्याब्रह्मफलं सुधी।
भवेत्स्वदारसन्तुष्टोऽन्मदारान् वा विवर्जयेत्।। तदेव. 2/76

22 आसनादीनि सरीक्ष्य, प्रतिलिख्य च यत्नत।
गृहणीयान्निक्षिपेद्वा यत्, सादानसमिति स्मृता।।

23 तदेव. 1/40

24 तदेव. 1/41

25 असन्तोषमविश्वासमारम्भं दुःखकारणम्।
मखा मूर्च्छाफल कुर्यात्, परिग्रहनिमन्त्रणम्। योगशास्त्रम्. 2/106

26 परिग्रहमहत्त्वाद्धि मज्जत्येव भवाम्बुधौ महापीत इव प्राणी,
त्यजेतस्मात् परिग्रहम्।। तदेव. 2/107

27 तदेव. 2/110

28 छेओ-अेओ वसणं-आयास-किलेस-भयविवागो य।
भरणं धम्मब्भसो, अरई आत्माओं सलाइं।।
दोससमूलजालं पुव्वरिसिविवज्जिभ जई वतं।
अत्थ हसि अणत्थं, कीस निरत्थ तव चरसि।।
वह-बंभण-भारणीसेहणाओं काओ परिग्गहे नत्थि।
तंज इ परिग्गहोज्जिम, जइ धम्मो तो णणु पवचो।। तदेव. 2/110

29 योगशास्त्रम् 2/115

30 दशस्यापि क्रता दिक्षु मत्र सीमा न लब्ध्यते।
ख्यातं दिक्विरतिरिति प्रथम तद्गुणव्रत।। तदेव. 3/01

31 दशस्यापि क्रता दिक्षु मत्र सीमा न लब्ध्यते।
ख्यातं दिक्विरतिरिति प्रथम तद्गुणव्रत।। तदेव. 3/01

32 दशस्यापि क्रता दिक्षु मत्र सीमा न लब्ध्यते।
ख्यातं दिक्विरतिरिति प्रथम तद्गुणव्रत।। तदेव. 3/01

33 तत्र व्रतस्थितो भक्त्या, सप्तक्षेत्यां धनं वचन्।
दयाया चातिदीनेषु, महाश्रावक उच्यते।। तदेव. 3/19

34 यः सह बाह्यमानित्यं च, क्षेत्रेषु न धनं वपेत्।
कथ वरeकश्चारित्रं, दुश्चरं सः समाचरेत्।।
योगशास्त्रम्. 3/120

35 तदेव 3/118

36 तदेव. 3/121

37 ततो गुरुणाभ्यर्णे प्रतिपत्तिपुर सरम्।
विदधीत विशुद्धात्मा प्रत्याख्यान-प्रकाशनम्।।
तदेव. 3/124

38 योगशास्त्रम्. 3/127

39 तदेव 3/130

40 तदेव. 3/134

41 तदेव. 3/45-46

42 तदेव. 3/153

43 योगशास्त्रम् 3/154